# Ishvaraproktam Shivapanchaksharamantrajapavidhyupadesham

# ઈશ્વરપ્રોક્તં શિવપઞ્ચાક્ષરમન્ત્રજપવિધ્યુપદેશમ્

## Document Information

Text title : Ishvaraproktam Shivapanchaksharamantrajapavidhyupadesham

File name : IshvaraproktaMshivapanchAkSharamantrajapavidhyupadesham.itx

Category : shiva, mantra, upadesha, advice, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshvarAkhyaH dashamAMshaH | adhyAyaH 38 | 1-25||

Latest update : September 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 10, 2024

*sanskritdocuments.org*

# ઈશ્વરપ્રોક્તં શિવપઞ્ચાક્ષરમન્ત્રજપવિધ્યુપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઈશ્વરાખ્યે)

- શિવગૌરીસંવાદે -

ઈશ્વરઃ (ઉવાચ)
પઞ્ચાક્ષરમૃષિશ્છન્દો બીજશક્તી ચ દૈવતમ્ ।
ન્યાસં ષડઙ્ગદિગ્બન્ધં વિનિયોગમશેષતઃ ॥ ૧॥

પ્રોક્તવાનહમાર્યાણાં જગતઃ સૃષ્ટિહેતવે ।
તતસ્તન્મન્ત્રમાહાત્મ્યાદૃષયસ્તપસેધિતાઃ ॥ ૨॥

સૃષ્ટિં વિતન્વતે સમ્યક્ સદેવાસુરમાનુષામ્ ।
અસ્યાઃ પરમવિદ્યાયા સ્વરૂપમધુનોચ્યતે ॥ ૩॥

આદૌ નમઃ પ્રયોક્તવ્યં શિવાયેતિ તતઃ પરમ્ ।
સૈષા પઞ્ચાક્ષરી વિદ્યા સર્વશ્રુતિશિરોગતા ॥ ૪॥

શબ્દજાતસ્ય સર્વસ્ય બીજભૂતા સમાસતઃ ।
પ્રથમં મન્મુખોદ્ગીર્ણા સા મમૈવાત્મવાચિકા ॥ ૫॥

તદા ચામીકરપ્રખ્યા પીનોન્નતપયોધરા ।
ચતુર્ભુજા ત્રિણયના બાલેન્દુકૃતશેખરા ॥ ૬॥

પદ્મોત્પલધરા સૌમ્ય વરદાભયપાણિકા ।
સર્વલક્ષણસમ્પન્ના સર્વાભરણભૂષિતા ॥ ૭॥

સિતપદ્માસનાસીના નીલકુઞ્ચિતમૂર્ધજા ।
અસ્યાં પઞ્ચવિધાવર્ણાઃ પ્રસ્ફુરદ્રશ્મિમણ્ડલાઃ ॥ ૮॥

પીતઃ કૃષ્ણસ્તથા ધૂમ્રઃ શ્વેતાભો રક્ત એવ ચ ।
પૃથક્પ્રયોજ્યા એવૈતે બિન્દુનાદવિભૂષિતાઃ ॥ ૯॥

અર્ધચન્દ્રાકૃતિર્બિન્દુર્નાદો દીપ્તશિખાકૃતિઃ ।

બીજં દ્વિતીયં બીજેષુ મન્ત્રસ્યાસ્ય વરાનને ॥ ૧૦॥

ગૌતમોઽત્રિર્વરારોહે વિશ્વામિત્રસ્તથાઙ્ગિરાઃ ।
ભરદ્વાજશ્ચ વર્ણાનાં ક્રમશઃ ઋષયઃ સ્મૃતાઃ ॥ ૧૧॥

ગાયત્ર્યનુષ્ટુભ્ ત્રિષ્ટુભ્ છન્દાંસિ બૃહતી વિરાટ્ ।
ઇન્દ્રો રુદ્રો હરિર્બ્રહ્મા સ્કન્દસ્તેષાં ચ દેવતાઃ ॥ ૧૨॥

મમ પઞ્ચમુખાન્યાહુઃ સ્થાનં તેષાં વરાનને ।
પૂર્વાદિચોર્ધ્વપર્યન્તં નકારાદિ યથાક્રમમ્ ॥ ૧૩॥

ઉદાત્તઃ પ્રથમો વર્ણઃ ચતુર્થશ્ચ દ્વિતીયકઃ ।
પઞ્ચમઃ સ્વરિતશ્ચૈવ મધ્યમો નિહતઃસ્મૃતઃ ॥ ૧૪॥

મૂલવિદ્યા શિવસ્યૈવ સૂત્રં પઞ્ચાક્ષરં તથા ।
નામાન્યસ્ય વિજાનીયાત્ સૈવ મે હૃદયં મતમ્ ॥ ૧૫॥

નકારઃ શિર ઉચ્યેત મકારસ્તુ શિખોચ્યતે ।
શિકારં કવચં તદ્વત્ વાકારો નેત્રમુચ્યતે ॥ ૧૬॥

યકારોઽસ્ત્રં નમઃ સ્વાહા વષડ્ઢું વૌષડિત્યપિ ।
ફડિત્યપિ ચ વર્ણાનાં મતઙ્ગત્વં યથા તથા ॥ ૧૭॥

તવાપિ મૂલમન્ત્રોઽયં કિઞ્ચિદ્ભેદસમન્વયાત્ ।
તત્રાસ્ય પઞ્ચમો વર્ણો દ્વાદશસ્વરભૂષિતઃ ॥ ૧૮॥

તસ્માદનેન મન્ત્રેણ મનોવાક્કાયભેદતઃ ।
આવયોરર્ચનં કુર્યાજ્જપહોમાદિકં તથા ॥ ૧૯॥

યથાપ્રજ્ઞં યથાશ્રદ્ધં યથાકાલં યથાસ્મૃતિ ।
યથાશક્તિ યથાસમ્પત્ યથાયોગં યથારતિ ॥ ૨૦॥

યદા કદાપિ વા ભક્ત્યા યત્રકુત્રાપિ વા કૃતા ।
યેન કેનાપિ વા દેવિ પૂજા મુક્તિં નયિષ્યતિ ॥ ૨૧॥

મય્યાસક્તેન મનસા યત્કૃતં મમ સુન્દરિ ।
તત્પ્રિયં ચ શિવં ચૈવ ક્રમેણાપ્યક્રમેણ વા ॥ ૨૨॥

તથાપિ મમ ભક્તા યે ન સન્તિ વિવશાઃ પુનઃ ।
તેષામર્થેન શાસ્ત્રેષુ મયૈવ નિયમઃ કૃતઃ ॥ ૨૩॥

પઞ્ચાક્ષરક્ષપિતપાપગણં ચ કૃત્સ્નમ્ ।
રક્ષાભિલિપ્તશિરસામભિરક્ષકેયમ્ ॥ ૨૪॥

રૂક્ષાભવન્ત્યખિલરાક્ષસયક્ષસઙ્ઘાઃ
સન્ધુક્ષિતાઃ પરિભવન્તિ શિવાક્ષજાલૈઃ ।
પ્રાતઃ પ્રદોષે નિશિ વાસરે વા
ત્ર્યક્ષાનુરક્તહૃદયો જપતિ પ્રમોદાત્ ॥ ૨૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઈશ્વરપ્રોક્તં શિવપઞ્ચાક્ષરમન્ત્રજપફલં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશ્વરાખ્યઃ દશમાંશઃ । અધ્યાયઃ ૩૮ । ૧-૨૫॥

- .. shrIshivarahasyam . IshvarAkhyaH dashamAMshaH . adhyAyaH 38 . 1-25..

Notes:
Śiva શિવ describes to Devī દેવી; the ŚivaPañcākṣari Vidyā શિવપઞ્ચાક્ષરી વિદ્યા and the procedure for conducting the Japa જપ of the ŚivaPaṅcākṣaraMantra શિવપઞ્ચાક્ષરમન્ત્ર i.e. Namaḥ Śivāya નમઃ શિવાય; anytime like Prataḥ પ્રાતઃ, Pradośa પ્રદોષ, Nishi નિશિ, Vāsaraḥ વાસરઃ.

Proofread by Ruma Dewan

*Ishvaraproktam Shivapanchaksharamantrajapavidhyupadesham*
pdf was typeset on September 10, 2024

Please send corrections to *sanskrit@cheerful.com*